**Nandadulal Mandal**
Assistant Professor
CSU, EKALAVYA CAMPUS
Dept. of Education
Email ID - nandadulalmandal3@gmail.com
Phone No-9533608266
B.Ed 2nd Year (2020-2021)
7.B, Environmental Education
1st Unit 1.3

# संस्कृतवाङ्मये पर्यावरणम्

पर्यावरणवैज्ञानिकानां मतानुसारं येषां पदार्थानां मेलनेन पर्यावरणं निर्माणं भवति। तेषु प्रधानं भवन्ति जलं वायुः प्रकाशः पृथ्वी आकाशः वृक्षलता पशुपक्षयश्च। संस्कृतसाहित्ये महाकविकालिदासः एकः उज्ज्वलः नक्षत्रः वर्तते। तस्य विरचितेषु ग्रन्थेषु अन्यतमं मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम्, रघुवंशम् ,कुमारसम्भवं, मेघदूतम्,ऋतुसंहारम् च वर्तन्ते। एतेषु पर्यावरणतत्वं बहुत्र समुपलभ्यते। कालिदासस्य सर्वासां रचनायां प्रकृतिं प्रति अनुरागः दर्शितः। अत्र पर्यावरणविषयकतत्त्वेषु मुख्यतः पञ्चमहाभूतानां सर्वाधिकं महत्त्वपूर्णमस्ति। कालिदासेन प्रतिपादितं यत् पञ्चमहाभूतानां सर्वाणि तत्त्वानि परोपकारिणि सन्ति। अस्मात् कारणात् दिलीपोऽपि परोपकारी अस्तीति। उक्तं च-

**"तं वेधा विदधे नूनं महाभूतसमाधिना।**

**तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः।।**"(रघुवंशम्- 1/29)

अभिज्ञानशाकुन्तले नान्दीश्लोके अष्टमुर्तिधरः शिवः तावत् क्षिति-अप्-तेज-मरुत्-व्योम-चन्द्र-सूर्याः च वर्तन्ते। पञ्चमहाभूतेषु जलस्य प्राथम्यं दत्तं कालिदासेन

अभिज्ञानशाकुन्तले।" **या सृष्टि स्रुष्टुराद्या..**"। जलेन स्नानादि सम्पन्नं भवति। अतः जलस्य शुद्धता आवश्यकीति। रघुवंशे तदर्थं कथयति-

**"निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितृणाम्।**

**तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित्।।"**

(रघुवंशम्- 5/8)

रघुवंशे पार्थिवाग्नेः परिचयः प्राप्यते। दिवासान्ते सूर्यस्य तेजधारणेन सन्धाग्निः अधिकम् उज्ज्वलं भवति। रघुवंशे रघुः अग्नितुल्यः।

**"दिनान्ते निहितं तेजः सवित्रेव हुताशनः।"** (रघुवंशम् – 4/1)

वायुकारणेन जीवाः श्वासः प्रश्वासं स्वीकुर्वन्ति। तस्मात् शुद्धवायुविषये उक्तमुक्तं यत्-

**" तस्योदये चतुर्मूर्त्तेः पौलस्त्यचकितेश्वराः।**

**विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव।।"** (रघुवंशम् – 10/73)

रघुवंशमहाकाव्ये वायोः शुद्धता विषये यज्ञस्य महात्वं कथितमस्ति।

**"त्रेताग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम्।**

**घ्रात्वा हविर्गन्धि रजोविमुक्तः समश्नुते मेलघिमानमात्मा।।"**

(रघुवंशम् – 13/37)

अङ्गानुकुलं कृषतानिवारकश्च वायुः शुद्धता-शीतलता-पोषकतायाः सूचकं भवति। देवगिरिं प्रति गमनशीलमेघस्य अधः अद्यः शीतलवायुः गच्छति। वृष्टिकारणात् पृथिव्याः सुगन्धं वायुमाध्यमेन मानवाः आस्वादयन्ति।

**"नीचैर्वास्यत्युपजिगमिपोर्देवपूर्वं गिरिं ते**

**शीतो वायुः परिणमयिता काननोदुम्बराणाम्।**"(मेघदूतम् -1/43)

महाकविकालिदासस्य काव्येषु केवलं मेघदूतं हि पर्यावरणसंरक्षणं प्रति अधिकं सचेतनमस्ति। तेन प्रकृतेः उपकरणं मेघं दूतरुपेण स्वीकृतम्। मेघस्य निर्माणप्रसङ्गेन उक्तं यत् –

**"धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः।"** (मेघदूतम् – 1/5)

प्राचीनकाले ध्वनिप्रदूषणात् रक्षणाय संगीतस्य प्रयोगं भवति स्म। एतत् उल्लेखनीयं यत् सामगानम् अथवा अन्यमन्त्रपठनमपि अस्य अपरं कारणमासीत्।

वेदगानेन वायुमण्डलं नियन्त्रितं भवति स्म। कालिदासेन अलकापुर्यां नृत्यगीते च मृदङ्गस्य मधुरं ध्वनेः उल्लेखं कृतम्। उत्तरमेघे उक्तं यत् **"सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।"**

तथा च-

**"त्वद्गम्भीरध्वनिषु शनकैः पष्परेष्वातेषु"।** (मेघदूतम् -2/1,5)

एवमुपायेन महाकालमन्दिरे सन्धायां वलिः / सन्धारत्रिकसमये मेघः नादं कुर्यात्।

"**कुर्वन् सन्ध्यावलिपटहतां शूलिनः श्लाघनीयाम्।**"(मेघदूतम् -1/35)

विरहिनी यक्षिणी अपि मनोविनोदनाय वीणासहितं गीतं गायति स्म। प्रोक्तं च-

"**मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।**" (मेघदूतम् -2/25)

कालिदासः अलकापुर्यां नृत्यगीते च मृदङ्गस्य मधुरं ध्वनेः उल्लेखं कृतम्। अङ्गानुकुलं कृषतानिवारकश्च वायुः शुद्धता-शीतलता-पोषकतायाः सूचकं भवति। पथ्वी संसारस्य धारकः वाहकश्च। अतः तस्याः रक्षा अस्माभिः करणीया इति।

“**पयोधरीभूतचतुःसमूद्रां जुगोपगरुपधरामिवोर्वीम्।**”(रघु.– 2/3)

पृथ्वीतत्त्वान्तर्गतः पर्वतः, वृक्षः, लता, तथा च अन्ये वनस्पतयः, पशुपक्षादयः च भवन्ति। रघुवंशमहाकाव्ये कविः कथयति पर्वतारोहनं सुखानुदायकं भवति। उद्भिदादीनामुपादेयता विषये कथयति- विषवृक्षमपि संरक्षेत्, स्वयं छेदनं असमीचिनमेव।

“**विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।**” (कुमारसम्भवम् – 2/55)

कुमारसम्भवे अपर्णायाः वृक्षादीनां प्रति पुत्रवत् स्नेहः आसीत्। तदर्थं कथयति-

“**गुहोऽपि येषां प्रथमाप्त जन्मनाम्।**

**न पुत्रवात्सल्यमपाकरिष्यति ॥** ” (कुमारसम्भवम्, 5/14)

अभिज्ञानशाकुन्तले पशुपक्षीणां साकं मानवस्य अदृश्यमेलवन्धनं वर्तते। नाटकस्य प्रारम्भे एव वैखानसः मृगानुसारीनं दुष्यन्तं पशुनां हननाय निषेधं क्रियते।

महर्षिकन्वस्य आश्रमस्य अनुपमशोभायाः मूले बृक्षलता तथा च तस्य सखिः प्रियंवदा अनुसूययोः उपरि वर्तते। शकुन्तला तस्याः दायित्वात् अधिकं क्रियते। यदा सा वदति- “**न केवलं तातनियोग एव अस्ति मे सोदरस्नेः अपि एतेषु** ” प्रथम (प्रथमाङ्कः) एतादृशं आश्रमवृक्षे जलसेचनकार्ये नियुक्ता शकुन्तलां दृष्ट्वा राजा मन्यते यत् कन्वः नीलपद्मपत्रेण शमीबृक्षं छेत्तुं प्रवित्तं वर्तते।

“**ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।**”

(अभिज्ञानशाकुन्तलम्- 1/17)

मालविकाग्निमित्रे चतुर्थाऽङ्के विदूषक-राजा च अशोकवृक्षं रक्षणाय प्रचेष्ठां कृतवन्तौ। हरिण अशोकबृक्षस्य पत्रं न भक्षयेत्। तस्मात् विदूषकः वकुलबालिकां कथयति। राजा अपि विदूषकं समर्थयति। **"अशोकपल्लवानि अभिलङ्घयितुम् इच्छति हरिणः। एहि निरावयावः एनम्। राजा – एवमेवास्मिन् रक्षणीयेऽविलम्वितेन भवितव्यम्।"** एतत् पर्यावरणरक्षणाय आनुकूल्यं भवति।

विक्रमोर्वशीयस्य चतुर्थाऽङ्के उर्वश्याः विरहे कातरः राजा कदलीवृक्षस्य सलिलगर्भा कुसुमे बास्पकुलं दृष्ट्वा प्रेयसीम् अन्वेषयति।

**"आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः।**

**कोपादन्तर्वाष्पे स्मरयति मा लोचने तस्याः।।"**

(विक्रमोर्वशीयम्-4/5)

अभिज्ञानशाकुन्तलं नाटके पशुपक्षिणां साकं मानवस्य अदृश्यमेलबन्धनं वर्तते। नाटकस्य प्रारम्भे एव वैखानसः मृगानुसारीनं दुष्यन्तं पशुहननाय निषेधं क्रियते।

**"खलु न खलु वाणः सन्निपात्योऽयमस्मिन्**

**मृदुनि मृगशरीरे (तुलराशाविवाग्निः) पुष्पराशाविवाग्निः।"**

(अभिज्ञानशाकुन्तलम्-1/10)

अयं निषेधः पर्यावरणरक्षणाय जीवरक्षणाय च ऋषिकुमारस्य सचेतनतां बोधयति। इयं सचेतनता राज्ञः मनसि जातम् । फलतः द्वितीयाऽङ्के दृश्यते स्म मृगहननाय सेनापतिं निषेधं क्रियते।

**"गाहन्तां महिषा निपानसलिलं श्रृङ्गैर्मुहुस्ताडितं**

**छायावद्ध कदम्वकं मृगकुलं रोमन्थमभ्यस्यतु।**

**विश्रुद्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले**

**विश्रामं लभतामिदं च शिथिलज्यावन्धमस्मद्ध नुः।।"**

(अभिज्ञानशाकुन्तलम्- 2/6)

कालिदासस्य दुष्यन्तः अत्र "**जिओ और जिनेदो**" अर्थात् स्वयं जीवनं धारयेत् अन्यान् अपि धारणे सहायकं भवेत्। इयं परिवेशरक्षणाय अनुकुलं वर्तते।

कालिदासः खाद्यखादकसम्पर्कमाध्यमेन पर्यावरणसचेतनतायाः परिचयं ददाति। मालविकाग्निमित्रे प्रार्थयति अतिवृष्टिः अनावृष्टिः तथा च पतङ्गादीनामुत्पातेन पर्यावरणं विनष्टं न स्यात्। पञ्चमाङ्के नाटकस्य अन्तिमपर्याये राजा पर्यावरणरक्षणाय सचेतना एका व्यक्तिः इव भाति। स प्रार्थयति यत् स यावत् पर्यन्तं पृथिव्याः पक्षाय नियुक्तं तिष्ठेत् तावत् दिनमिति विगमः अर्थात् अतिवृष्टिः अनावृष्टिः तथा च पतङ्गादीनां उत्पातेन पर्यावरणस्य भारसाम्य विघ्नं प्रजाविनष्टं च न स्यात्।

**"नित्यमेतावदेव मृगये प्रतिपक्षहेतोः।**

**आशास्यमीतिविगमप्रभृति प्रजानाम्।**

**सम्पत्स्यते न खलु गोप्तरि अग्निमित्रे।।"** (मालविकाग्निमित्रम्- 5/20)

कालिदासस्य विक्रमोर्वशीये कदाचित् मेघः वृष्टिः विद्युत् इत्यादीनां समावेशः दृश्यते। तस्मिन् समये पशुपक्षिणां स्वच्छन्दविचरणम् आसीत्। तथा च ताः जीवनस्य परिपूरकरुपेण अवस्थानं कुर्वन्ति स्म। किन्तु राजा विक्रमः एतासां पशुपक्षीणां मृगया इति भावना स्वप्नेऽपि न चिन्तयन्ति। अपि तु तासां पार्श्वे स्वप्रयोजनस्य वार्ता व्यक्तं कृतम्। अपि तु ताः मनुष्यस्य जीवनेन सह युक्ताः इति महाकवेः पर्यावरणसचेतनतायाः एकमुदाहरणम्। सप्तमाङ्कस्य अन्तिमे भरतवाक्ये श्रुयते पृथिवी तथा च तस्य पर्यावरण – रक्षणेन प्रजानां मङ्गलं कुर्यात्। इदं प्रार्थनां श्रुयते-

**"प्रवर्ततां प्रकृतिहिताय पार्थिवः।"** (अभिज्ञानशाकुन्तलम्- 7/35)

महाकविः अत्र प्राकृतिकपर्यावरणस्य एकम् अन्यतमं तावत्- खाद्यखादकः सम्पर्कः। यथा- विडालमुषिकः वृत्त्वान्तः। शाकुन्तले सप्तमाऽङ्के अपुर्वमेकं दृश्यम् –सिंहसावकेन सह दुष्यन्तपुत्रसर्वदमनस्य क्रीडा।

**"अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।**

**प्रक्रीडितुं सिंहशिशुं वलात्कारेण कर्षति।।"** (अभिज्ञानशाकुन्तलम्- 7/14)

अनेन व्याजेन कालिदासः बोधयति हिंस्रजन्तुमात्रेण हानिकारकः नास्ति अपि तु कदाचित् तेऽपि मानवस्य वश्यतां स्वीकुर्वन्ति। जगति सर्वेऽपि पर्यावरणस्य अङ्गाः। स्मृतिशास्त्रेऽपि हिंस्रप्राणीमात्रेण वध्यः इति नास्ति सूचयति। वर्तमानकाले विद्यमानसमस्यासु पर्यावरणविषयकसमस्या एकाज्वलन्तसमस्या। प्राकृतिकपर्यावरणेन साकं जीवस्य संयोगं स्थापयित्वा तस्य साहित्ये पर्यावरणसचेतनतां सुचयति।

धन्यवादः